# श्री बुध कवचम्

बुधस्तु पुस्तक धरः कुङ्कुमस्य समद्युतिः
पीतांबरधरः पातु पीतमाल्यानुलेपनः १

कटिं च पातु मे सौम्यः शिरोदेशं बुधस्तथा
नेत्रे ज्ञानमयः पातु श्रोत्रे पातु निशाप्रियः २

घ्राणं गन्धप्रियः पातु जिह्वां विद्याप्रदो मम
कण्ठं पातु विधोः पुत्रः भुजौ पुस्तक भूषणः ३

वक्षः पातु वराङ्गश्च हृदयं रोहिणीसुतः
नाभिं पातु सुराराध्यो मध्यं पातु खगेश्वरः ४

जानुनी रोहिणेयस्च पातु जङ्घे अखिलप्रदः
पादौ मे बोधनः पातु पातु सौम्योखिलं वपुः ५

एतद्धि कवचं दिव्यं सर्व पाप प्रणाशनम्
सर्व रोग प्रशमनं सर्व दुःख निवारणम् ६

आयुरारोग्य शुभदं पुत्र पौत्र प्रवर्धनम्
यः पठेत् श्रुणुयात् वापि सर्वत्र विजयी भवेत् ७

इति श्री ब्रह्म वैवर्त पुराणे बुध कवचम् संपूर्णम्